**Series : MNL2K** **SET~4**

प्रश्न-पत्र कोड
Q.P. Code **52**

रोल नं.
Roll No.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम्
# SANSKRIT

*अवधि : होरा**त्रयम्***
*निर्धारित समय : **3** घण्टे*
*Time allowed : **3** hours*

*पूर्णाङ्काः : **80***
*अधिकतम अंक : **80***
*Maximum Marks : **80***

**नोट :**

(I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।

(II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।

(III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।

(IV) **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें ।**

(V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

**NOTE :**

(I) Please check that this question paper contains **15** printed pages.

(II) Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.

(III) Please check that this question paper contains **18** questions.

(IV) **Please write down the Serial Number of the question in the answer-book at the given place before attempting it.**

(V) 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.

**General Instructions :**

*This question paper is divided into **4** (Four) sections.*

*It has total **18** questions.*

***Section A** – 1 Question no. 1 to 1*

***Section B** – 3 Questions no. 2 to 4*

***Section C** – 7 Questions no. 5 to 11*

***Section D** – 7 Questions no. 12 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

**सामान्य-निर्देशाः**

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति।*

*अस्मिन् प्रश्नपत्रे **अष्टादश (18)** प्रश्नाः सन्ति।*

***खण्डः 'क'** – 1 – प्रश्नसंख्या 1*

***खण्डः 'ख'** – 3 – प्रश्नसंख्या 2 – 4*

***खण्डः 'ग'** – 7 – प्रश्नसंख्या 5 – 11*

***खण्डः 'घ'** – 7 – प्रश्नसंख्या 12 – 18*

*विशिष्टनिर्देशानुसारं प्रश्नाः समाधेयाः।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया।*

**खण्डः 'क'** ***10 अङ्काः***

**अपठितावबोधनम्**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *10*

भारतवर्षः अस्माकं जन्मभूमिः अस्ति। भारतदेशः संसारे प्रसिद्धः अस्ति। अस्यैव अन्नेन, जलेन वायुना च वयं पालिताः पोषिताः च भवामः। इयं जन्मभूमिः भारतभूमिः अस्माकं मातास्ति। अस्याः महिमा वर्णयितुं न शक्यते। इयं सा भारतभूमिः अस्ति, यत्र बहवः महर्षयः देशभक्ताः महाराजाश्च अभवन्। ये स्वबुद्धिबलेन स्वबाहुबलेन च विश्वस्य विजयम् अकुर्वन्। यदा सर्वस्मिन् जगति अविद्यायाः प्रसारः आसीत्, तदा अत्र ऋषयः वेदानां गानम् कुर्वन्ति स्म। ते विदेशान् गत्वा ज्ञानस्य प्रसारम् अकुर्वन्। अत्रैव श्रीरामचन्द्रः, श्रीकृष्णः, गौतमबुद्धः, दयानन्दः अन्ये च महापुरुषाः अभवन्, येषां नाम न केवलं भारतवर्षे अपितु समस्ते जगति प्रसिद्धम् अस्ति। अस्माकं कर्तव्यमस्ति यद् वयं भारतवर्षस्य सदा उन्नतिं रक्षां च कुर्याम।

(अ) एकपदेन उत्तरत — (केवलं प्रश्नद्वयम्) *2×1=2*

(i) जगति कस्याः प्रसारः आसीत् ?

(ii) वयं कस्य सदा उन्नतिं कुर्याम ?

(iii) भारतवर्षः केषां जन्मभूमिः अस्ति ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) *2×2=4*

(i) अत्र (भारते) के के महापुरुषाः अभवन् ?

(ii) वयं केन पालिताः पोषिताः भवामः ?

(iii) अस्माकं किं कर्तव्यमस्ति ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। *1*

(ई) यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'देशभक्ताः' अस्य पदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम् ?

(A) बहवः (B) महर्षयः

(C) महाराजाः (D) अभवन्

(ii) 'भवामः' क्रियायाः कर्तृपदं किम् ?

(A) ते (B) वयम्

(C) यूयम् (D) अहम्

(iii) गद्यांशे 'संसारे' अस्य समानार्थकपदं किं प्रयुक्तम् ?

(A) जगति (B) भूमौ

(C) भारते (D) समस्ते

(iv) 'आगत्य' इत्यस्य विपर्ययः कः ?

(A) यदा (B) ज्ञानस्य

(C) अस्य (D) गत्वा

**खण्ड: 'ख'** ***15 अङ्का:***

**रचनात्मकं कार्यम्**

**2.** भवती आशिमा। भवती पुस्तकालयात् एकं संस्कृतपुस्तकं 'सुभाषितम्' स्वीकृत्य पठितवती। तस्य पुस्तकस्य छायाप्रतिं स्वभ्रातुः सकाशं प्रेषयति। अधोलिखितं पत्रं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखतु। $10\times\frac{1}{2}=5$

दिल्ली:

दिनाङ्क: ______________

प्रिय (i) ______________

सस्नेहं नमो नमः।

अत्र कुशलं (ii) ____________। भवान् लिखितवान् यत् संस्कृतभाषायां लिखितं पुस्तकं पठितुम् (iii) ____________। मया पुस्तकालयात् (iv) ____________ संस्कृतपुस्तकं स्वीकृत्य पठितम्। तस्मिन् अनेकानि (v) ____________ निहितानि सन्ति, येभ्य: मानवा: सदाचारवन्त: भवितुं शक्नुवन्ति। तस्य (vi) ____________ छायाप्रतिं कारयित्वा अहं (vii) __________ सकाशं प्रेषयामि। पठने भवत: रुचि: सर्वदा (viii) ____________। भवान् कथमस्ति इति लिखतु। मातापितरौ (ix) __________ मम प्रणामाञ्जलि: निवेदनीया।

भवदीया स्नेहसिक्ता

(x) ____________

आशिमा

**मञ्जूषा**

| |
|---|
| प्रति, इच्छामि, भगिनी, तत्रास्तु, वर्धताम्, भ्रात:, भवत:, पुस्तकस्य, जीवनमूल्यानि, सुभाषितम्। |

**3.** अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत । *5×1=5*



**मञ्जूषा**

| |
|---|
| हस्ते, उपविशति, सीता, शेते, माला, अस्ति, धनु:, अङ्के, शुक:, अस्ति, वृक्षौ, कण्ठे, राम:, शयनम् । |

**अथवा**

निम्नलिखितं विषयम् अधिकृत्य मञ्जूषा-प्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं **पञ्चभि:** संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत – *5×1=5*

**'वृक्षा: अस्माकं मित्राणि'**

**मञ्जूषा**

| |
|---|
| परोपकारम् , वृक्षा:, पक्षिभ्य:, सत्पुरुषा:, वास: आतपम्, सहन्ते, फलानि, छायां, पुष्पाणि, काष्ठम्, गृहाणां कृते, यच्छन्ति, वृष्टि:, भूमे: संरक्षणम्, विश्रामं, सम्यक्, पथिका: । |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत – (केवलं वाक्यपञ्चकम्) *5×1=5*

(i) तुम सब विद्यालय जाते हो।
You all go to school.

(ii) मैं कल अपने मामा के घर गया था।
I went to my maternal uncle's home yesterday.

(iii) धनिक निर्धन को धन देते हैं।
The rich give money to the poor.

(iv) गीता कल गाना गायेगी।
Tomorrow Geeta will sing a song.

(v) यह मेरे मित्र का घर है।
This is my friend's home/house.

(vi) हमें पर्यावरण की रक्षा करनी चाहिए।
We should protect the environment.

(vii) निधेय अपने पिताजी के साथ घूमने जाता है।
Nidheya goes for a walk with his father.

**खण्डः 'ग'** ***25 अङ्का:***

**अनुप्रयुक्त-व्याकरणम्**

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) क्रोधो हि शत्रुः प्रथमो नराणाम्।

(ii) कथं जनः + तम् परितोषयिष्यति ?

(iii) महानगरमध्ये चलदनिशम् कालायसचक्रम्।

(iv) "एतत् भवान् पश्यति न ?" इति प्रति + अवोचत्।

(v) आपेदिरेऽम्बरपथं परितः पतङ्गाः।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) राम: कुशलवौ आसनार्धम् उपवेशयति।

(A) कुश: च लवौ च

(B) कुश: च लव: च

(C) कुशौ च लवौ च

(D) कुशौ च लव: च

(ii) वृक्षस्य उपरि वानर: आरोहति।

(A) वृक्षे उपरि

(B) वृक्षस्योपरि

(C) वृक्षोपरि

(D) वृक्षौपरि

(iii) अहमेव स्थितप्रज्ञ: इव स्थित्वा सर्वेषां रक्षाया: उपायान् चिन्तयिष्यामि।

(A) स्थिता प्रज्ञा यस्य स:।

(B) स्थिता प्रज्ञा यस्या: सा

(C) स्थित: प्रज्ञ: यस्या सा

(D) स्थिता: प्रज्ञा: यस्मै तत्

(iv) समयम् अनतिक्रम्य सर्वेषां महत्त्वं विद्यते।

(A) उपसमयम्

(B) अनुसमयम्

(C) प्रतिसमयम्

(D) यथासमयम्

(v) अभियुक्त: च अतीव कृशकाय: आसीत्।

(A) कृश: च काय: च

(B) कृशं च कायं च

(C) कृश: काय: यस्य स:

(D) कायं च कृशं च

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) कश्चन निर्धनो जन: भूरि परिश्रम्य किञ्चित् वित्तम् उपार्जितवान्।

(A) उप + अर्ज् + क्तवतु

(B) उप + अर्ज् + क्त

(C) उप + अर्ज् + तव्यत्

(D) उप + अर्ज् + अनीयर्

(ii) अवक्र + तल् यथा चित्ते तथा वाचि भवेद्यदि।

(A) अवक्रत्वम्

(B) अवक्रता

(C) अवक्रतला

(D) अवक्रतल्

(iii) किं कुपिता एवं भणति ?

(A) कुप् + ता

(B) कुपित + ता

(C) कुपित + टाप्

(D) कुपित + तल्

(iv) पुत्रद्वयोपेता बुद्धि + मतुप् पितुर्गृहं प्रति चलिता।

(A) बुद्धिमान्

(B) बुद्धिमन्त:

(C) बुद्धिमत्य:

(D) बुद्धिमती

(v) तपोवनवासिनो देवी इति नाम्ना आह्वयन्ति।

(A) देव + ङीप्

(B) देवी + ङीप्

(C) देव + ई

(D) देव + टाप्

**8.** वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत – (केवलं प्रश्नत्रयम्)

*3×1=3*

(i) राधिका – आराध्ये ! त्वं कुत्र गच्छसि ?

आराध्या – राधिके ! मया तु हट्टम् _________ ।

(A) गच्छ्यते

(B) गम्यते

(C) गच्छामि

(D) गम्यन्ते

(ii) राधिका – ________ हट्टं किमर्थं गम्यते ?

आराध्या – अहं पुस्तकं क्रेतुं तत्र गच्छामि ।

(A) त्वम्

(B) त्वया

(C) अहम्

(D) मया

(iii) राधिका – एवं वा । मह्यमपि पुस्तक-पठनं रोचते ।

आराध्या – तव प्रियं पुस्तकं किम् ________ ?

(A) अस्ति

(B) भूयते

(C) स्त:

(D) सन्ति

(iv) राधिका – मम प्रियं पुस्तकं हितोपदेश: अस्ति ।

आराध्या – अस्तु । अधुना ________ चलामि ।

(A) मया

(B) आवाभ्याम्

(C) आवाम्

(D) अहम्

**9.** कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) राघवः प्रतिदिनं प्रातः (5:30) वादने उत्तिष्ठति।

(ii) सः (6:00) वादने योगासनं करोति।

(iii) ततः (7:15) वादने स्नाति।

(iv) तदनन्तरं मित्रेण सह (8:45) वादने विद्यालयं गच्छति।

(v) (2:00) वादने विद्यालयात् गृहमागच्छति।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) हयाः नागाः __________ बोधिताः वहन्ति।

(ii) यदा किञ्चिद् अविनयं पश्यति __________ एवम् अधिक्षिपति।

(iii) न तावत् कलहेन समयं __________ यापयन्तु।

(iv) __________ गच्छति भवान्?

**मञ्जूषा**

| |
|---|
| वृथा, तदा, कुत्र, च। |

**11.** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) <u>एका</u> सिंहः सुखेन विश्राम्यते।

(A) एकम्

(B) एकः

(C) एकेन

(D) एकाः

(ii) त्वम् पाठं <u>पठति</u>।

(A) पठसि

(B) पठामि

(C) पठथः

(D) पठथ

(iii) ह्यः मम मातुलः युद्धक्षेत्रात् प्रत्यागमिष्यति ।

(A) प्रत्यागमिष्यसि

(B) प्रत्यागच्छति

(C) प्रत्यागच्छत्

(D) प्रत्यागच्छन्

(iv) कीदृशः तव मैत्री ?

(A) कीदृशम्

(B) कीदृश्यः

(C) कीदृशी

(D) कथम्

## खण्डः 'घ'

## पठितावबोधनम् *30 अङ्काः*

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन् आसीत् । तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत् । अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत । सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः तम् उत्थापयितुं बहुवारम् यत्नमकरोत् । तथापि वृषः नोत्थितः ।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कृषकः कीदृशं वृषभं तोदनेन नुदन् अवर्तत ?

(ख) तथापि कः न उत्थितः ?

(ग) कः क्षेत्रकर्षणं कुर्वन् आसीत् ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) दुर्बल: वृषभ: केन गन्तुमशक्त: आसीत् ?

(ख) कृषक: काभ्यां क्षेत्रकर्षणं कुर्वन् आसीत् ?

(ग) कीदृशः कृषीवलः तमुत्थापयितुं बहुवारं यत्नम् अकरोत् ?

(iii) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'क्रुद्ध: कृषीवल:' अनयो: विशेष्यपदं किम् ?

(ख) 'स: ऋषभ: हलमूढ्वा गन्तुमशक्त: क्षेत्रे पपात' अत्र 'पपात' क्रियाया: कर्तृपदं किम् ?

(ग) 'असमर्थ:' इत्यस्य पर्यायपदं गद्यांशे किं प्रयुक्तम् ?

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत – 5

गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति निर्बल: ।
पिको वसन्तस्य गुणं न वायस:
करी च सिंहस्य बलं न मूषक: ॥

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) क: बलं वेत्ति ?

(ख) वायस: कस्य गुणं न वेत्ति ?

(ग) सिंहस्य बलं क: जानाति ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) गुणं क: वेत्ति क: न वेत्ति ?

(ख) वसन्तस्य गुणं क: जानाति ?

(ग) करी कस्य बलं वेत्ति ?

(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'निर्बल:' इत्यस्य विलोमपदं किं प्रयुक्तम् ?

(ख) 'गज:' अस्य क: पर्याय: अत्र प्रयुक्त: ?

(ग) 'न वेत्ति निर्बल:' अत्र क्रियापदं किम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

*रामः* – अतिदीर्घः प्रवासोऽयम् दारुणश्च । (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः ?

*विदूषकः* – (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?

*लवः* – तस्याः द्वे नामनी।

*विदूषकः* – कथमिव ?

*लवः* – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

*रामः* – अपि च इतस्तावद् वयस्य !
मुहूर्त्तमात्रम्।

*विदूषकः* – (उपसृत्य) आज्ञापयतु भवान्।

*रामः* – अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः ?

(नेपथ्ये)

इयती वेला सञ्जाता, रामायणगानस्य नियोगः किमर्थं न विधीयते ?

*उभौ* – राजन् ! उपाध्यायदूतोऽस्मान् त्वरयति।

*रामः* – मयापि सम्माननीय एव मुनिनियोगः।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) 'आज्ञापयतु भवान्' इति कः वदति ?

(ख) तपोवनवासिनः युवयोः जननीं केन नाम्ना आह्वयन्ति ? –

(ग) 'तस्याः द्वे नामनी' इति कः कथयति ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) रामः केन आविष्टः अनयोः मातरं नामतो वेदितुम् इच्छति ?

(ख) कः अस्मान् त्वरयति ?

(ग) 'वधूः' इति नाम्ना सीतां कः आह्वयति ?

(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'अहं पुनः पृच्छामि' अत्र 'पृच्छामि' क्रियायाः कर्तृपदं किम् ?

(ख) 'ज्ञातुम्' इति पदस्य समानार्थकं पदं किम् ?

(ग) 'अतिदीर्घः प्रवासः' अनयोः विशेषणपदं किम् ?

**15.** अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) बकः छलेन मीनान् भक्षयति।

(ii) मन्त्री सभायाम् अपि अकातरः भवेत्।

(iii) निर्मलम् जलं नास्ति।

(iv) बुद्धिमती आत्मपुत्रौ चपेटया प्रहरन्ती जगाद।

(v) सः कृच्छ्रेण भारं वहति।

**16.** मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत – *4×1=4*

विचित्रे खलु संसारे नास्ति किञ्चित् निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः ॥

**अन्वयः** –

(i) __________ संसारे खलु किञ्चित् (ii) __________ न अस्ति। (iii) __________ चेद् धावने वीरः (तर्हि) भारस्य (iv) __________ खरः (वीरः) भवति।

**मञ्जूषा**

| |
|---|
| वहने, विचित्रे, अश्वः, निरर्थकम्। |

**अथवा**

अधोलिखितश्लोकस्य भावार्थे रिक्तस्थानानि मञ्जूषायाः साहाय्येन पूरयित्वा पुनः लिखत – *4×1=4*

त्यक्त्वा धर्मप्रदां वाचं परुषाम् योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥

**भावार्थः** –

यः जनः धर्मप्रदां (i) __________ वदति, सः न केवलं स्वस्य जीवनम् अपितु अन्येषामपि जीवनं रसमयं करोति। किन्तु (ii) __________उक्त्वा यः सर्वत्र कटुतां (iii) __________। एतादृशः जनः मूर्खः भवति। कठोरवचनानां प्रयोगः तु (iv) __________ कटुफलस्य भक्षणस्य सदृशम् एव भवति।

**मञ्जूषा**

| |
|---|
| कठोरवचनम्, अपक्वस्य, प्रसारयति, वाचम्। |

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुन: लिखत – $8\times\frac{1}{2}=4$

(i) तत्र राजसिंह: नाम राजपुत्रः वसति स्म ।

(ii) सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद ।

(iii) अस्ति देउलाख्यो ग्रामः ।

(iv) पश्चाद् अन्यो द्वितीयः कश्चिद् लक्ष्यते ।

(v) मार्गे गहनकानने सा एकं व्याघ्रं ददर्श ।

(vi) अयमेकस्तावद् विभज्य भुज्यताम् ।

(vii) कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ: ?

(viii) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।

**18.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत – (केवलं प्रश्नत्रयम्) $3\times1=3$

(i) यदि एवं तर्हि मां निजगले बद्ध्वा सत्वरम् चल ।

(A) शीघ्रम् (B) सत्यम्

(C) वनम् (D) अनृतम्

(ii) वायुमण्डलं भृशम् दूषितमस्ति ।

(A) न्यूनम् (B) अत्यधिकम्

(C) सर्वम् (D) अन्तिकम्

(iii) दुर्बलः वृषः जवेन गन्तुम् अशक्त: चासीत् ।

(A) समर्थ: (B) सबल:

(C) असमर्थ: (D) शक्य:

(iv) गावश्च गोभिः तुरगाः तुरङ्गैः ।

(A) खरा: (B) गजा:

(C) सिंहा: (D) अश्वा: